र्वमंत्राणांमुख्यतात्पर्यात्॥तथाचश्रुतिस्फुटावाम्नातं॥अतःऋषयोदधुस्त्वयिमनोव
चनाचरितमिति॥यथाहिराजस्फुटप्रबलशत्रुजयेनामात्यादिस्फूर्त्यतेत्वयाप्रबलशत्रु
जितस्त्वंधन्यइतिनामोस्फुटितरमात्यादिपर्यवसन्नाअमात्यादिषुजयकारित्वाभावा
त्किंतुराजनतात्पर्यवतीतवराजाशत्रुजेतामुख्यधन्यस्तदमात्यस्तान्॥भवदादिर्धन्यइ
एवंननदेवतास्वघटमानेश्वरसंबंधिभिसर्वस्मृत्वादिभिःसासादेवतास्फूर्त्यते॥न
तिषांमंत्राणांननदेवतास्फुटात्पर्यंकिंतुपरमेश्वरएवनदेभदृष्टेश्चतद्वयवादेवता
स्फूर्यंतेइतिमुख्यतात्पर्यंपरमेश्वरएव॥तद्यथा॥सोमःपवतेजनितामतीनांजनिता
दिवोजनितापृथिव्याः॥जनिताग्नेर्जनितासूर्यस्यजनितेंद्रस्यजनितेतिविष्णोः॥

त्वमग्नेरुद्रोअसुरोमहोदिवइत्यादि॥नात्रवर्ण्यमानंसर्वस्रष्टत्वसर्वात्मकत्वादिकंसोमाग्नि
दिषुसंभवति॥अतोयद्भेददृष्ट्यासोमादिःस्तूयतेतत्रैवपरमेश्वरेमुख्यतात्पर्यमिति
तेषांपरमेश्वरतात्पर्यकत्वसूचनायेवरवलुमंत्रैस्तत्तद्देवतात्वसंभावितैरीश्वरमात्रा॰श्रि
तैर्धर्मैरेवसासादेवतास्तूयतेअन्यथातत्तद्देवतामात्रा॰श्रितधर्मैरेवस्तूयेत॥नचाग्न्य
दीनामपित्वात्तत्र्येणेश्वरत्वमितिवाच्यं॥सर्वेशात्स्रविरूपात्तेकेश्वरत्ववादापत्तेः॥तस्मा
दिकएवपरमेश्वरः॥सएवसर्वैर्वेदैःसर्वदास्तूयतइतिस्थितं॥अतएवसर्वैर्वेदैरायत्यप
मामनंतिवेदैश्चसर्वैरहमेववेद्यइतिसर्ववेदप्रतिपाद्यत्वमुच्यमानंयुज्यते॥तस्मात्तत्तद्दे
वतामंत्राअपिपरमेश्वरपरतयाप्रयुज्यमानानासंगताः॥अतएवसर्वत्रविशिष्टैःसमे रांम्
काममाक्रमकामायमह्यंकामेश्वरोवैश्रवणोददातुकुबेरायवैश्रवणायेत्यादिमंत्राः कु ३७
रा

रविषयाःपरमेश्वरेमंत्रपुष्पादिप्रयुज्यंते॥अतएवचमनामहेचारुदेवस्यनाममर्तीअ
र्यस्यतेइत्यादयोग्निसूक्तस्थानाममाहात्म्यमंत्राः॥परमेश्वरनामविषयेतत्रतत्रोपन्य
स्यंते॥रूपंरूपंप्रतिरूपोबभूवइंद्रोमायाभिःपुरुरूपईयतइतींद्रसूक्तस्थोपिमंत्रईश्वर
स्यमायाप्रतिविंबितत्वनानात्वविषयेउदाहियते॥उपपादितंचेदंचतुर्थमंत्रेधिकरणे
पन्यासेनेत्युपरम्यते॥तस्मादत्रमंत्रेयत्राकरणकरक्षणास्यपरमेश्वरलिंगस्योपलंभा
त्परमेश्वरएवगवद्विप्लुलपरत्वंनासमंजसं॥अथस्वराः॥उरु॥प्रातिपादिकस्वरेणोदा
त्तः॥ते॥अनुदात्तंसर्वमित्यपादादावित्यधिकारात्यूष्मोदेनुदात्त आदेशः॥ज्यः॥ज्ञि
भावे॥अकर्तरिकारकादनुदात्तः॥परि॥उक्तं॥एति॥तिङ्निघातः॥बभूव॥उक्तं॥विरो
चमानं॥रुचदीप्तौ॥लटश्शानचावा॥लसार्वधातुकानुदात्तेशपः॥पित्वादनुदात्तत्वे

आघ्रादानरोयमानधद्स्थगतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिःस्वरः॥महिषस्य॥
फिट्सूत्रम्॥धामनित्स्वरः॥विश्वेभिः॥स्वांगशब्दात्मित्यादिकृदानतं॥बहुलंछंदसीति
सएसभावाभावः॥अग्ने॥आमंत्रितेनिघातः॥त्वयत्तोभिः॥दासीभारादेराकृतिग
णत्वात्नत्रपाग्रत्यूर्वपदप्रकृतिस्वरत्वं॥यद्वापरादिश्छंदसिबहुलमित्यन्नपरादिश्च
परांतश्चभूर्वेतिश्चापिदृश्यतेपूर्वादथश्चदृश्यतेनदृनिवार्तिकात्पूर्वपदंतोदानत्वादि॥इदं
दृदिपरेमेश्वर्येदृतिधातोरुत्पन्नदृदृशोर्योगदृत्यापरेमेश्वरपरदृतिचेदगिगतावि
त्यनउत्पन्नोग्निशब्दोपिचेतनाचेतननजगतोगतेरीश्वरायत्तत्वादीश्वरपरोयोगदृत्या
गोण्यावृत्यावेतिनकिंचिद्विरुध्यते॥त्रीदृधिदीप्तौ॥गत्यर्थाकर्मकेतिकर्तरिक्तः॥ सांमू
स्त्रीदितोनिष्ठायामिनाडभावः॥नलोपः॥झषस्तथोर्धोधदृनिनिष्ठातकारस्यधः॥ ३८

प्रत्ययस्वरेणोदात्तः॥अदभ्येभिः॥दंभेर्निष्ठायांमत्यविभाषे॥नीटूत्रनिषेधः॥उदितो
वेतिकायांवेटूत्वात्॥नकारलोपः॥झषस्तथोर्धोनिधत्तं॥नञ्समासेत्र्यपूर्वपदप्रकृति
स्वरत्वं॥पायुभिः॥पारस्करे॥कृवापेत्युण्॥आतोयुक्चिण्कृतोः॥प्रत्ययस्वरेरूपोनु
दात्तत्वमध्यादानतः॥पाहि॥निङ्निघातः॥अस्मान्फिट्स्वरः॥ ९ ॥अथपुनःप्रार्थयि
तुंजनोस्मारकत्वंव्यंजनायजाह्नवीजनकत्वंमनेऽलंपूरकत्वंचाह॥ ॥धन्वयोनःकृणु
तगातुमूर्मिंगोक्रेरुर्मिरभिनस्तिसः॥विश्वासनानिजठरेषुधेनेनर्नवाक्चरनिप्रस्फु
रु॥ १० ॥गातुंगमनशीलंउर्मिउदकंचतुर्मुखार्हणोदकमावरणोदकंचधन्वनिअंतरिक्षे
स्यातःकृणुमस्मर्नदीरूपप्रवाहेणायुक्तंकरोतिभवानितिशेषः॥धन्वांतरिक्षमितियास्क
नतःशुक्रेनिर्मलेऊर्मिभिरुपलक्षितंतंजलोघंसा ऋमिंअभिनस्तिअभिगमयति॥

नक्षगंतो अंतर्भो विनष्यर्थः॥ भागीरथीरूपेण भूलोकेकरोतीत्यर्थः॥ येनाविश्वाविश्ववानिस
र्वाणिसनानितन्नद्रूक्तभजनानिजठरेषुहृदयेषु धत्तेस्थापयतिअनुसंद्धातीतियावत्
तत्तद्रवनारूपेणतन्नद्रूजनमनुसंधायफलंददातीतिभावः॥ जठरस्यावनारभेदानू
दमाश्रित्यबहुत्वं॥ यद्वाजठरेषुतन्नद्रूक्तहृदयेषुस्थितानितानिभजनानिसंकल्पितमा
त्राणीतियावत्॥ धत्तेपोषयतिवर्धयतीतियावत्॥ योयोमत्कोयथायथाहृदयेसंक
ल्यभजतीतितथातथाश्रद्धानद्रूजनंपुष्टिंकृत्वाफलंसीत्यर्थः॥ अतएवनवास्कअपूर्वाक
प्रसूषुगोगोपीरूपमातृषुअंतःमध्येचरतिपुत्ररूपेणसंचरेत्यर्थः॥ प्रसिसंहिवत्सा
रणप्रकरणेभगवतिपुत्रभावंकुर्वतीनांगोगोपीनांवत्सवत्सपालरूपतत्तत्पुत्ररूपे
णभगवानचरदिति॥ तदुक्तंश्रीमद्भागवते॥ कृष्णमुक्तंजनक्षीराःकिमुगावोनुमात

रः॥ पयोमियास्यामपिबत्पुत्रस्नेहस्नुतान्यलं॥ भगवान्देवकीपुत्रःकैवल्याद्यखिलप्रदः॥ ना
सामविरतंकृष्णेकुर्वतीनांस्वकेसुते॥ नपुनःकल्पतेराजन्संसारोज्ञानसंभवइति॥ गोगो
पीनांमातृतास्मिन्सर्वात्मेहार्थकंविना॥ पुराणवदात्मपिहरेर्लोकनामायया विनेत्यादि॥
अथस्वराः॥ धन्वन्॥ गत्यर्थाभ्यांवेः॥ निनिंदितान्नुम्॥ सप्तम्यालुक्॥ नित्यादाद्यदात्तं
स्नोनः॥ स्वरितवरे॥ अस्मन्नुउत्तरपदादिः॥ नित्यादायुदात्तं॥ गानुं॥ गाङ्गतौ॥ कमिम
नीतिनुप्रत्ययेप्रत्ययस्वरेणानोदात्तत्वं॥ ईर्मि॥ आर्तेरूचेनिमिप्रत्ययेप्रत्ययस्वरः॥ अभि
उपसर्गाश्चाभिवर्जमित्यनोदात्तः॥ नक्षति॥ निरुनिघातः॥ स्रं॥ सृमतेरन्येभ्योपिदृश्यं
तेइतिउः॥ ढापिउप्रत्ययाकारेणाटेनोत्तरएकादेशः॥ ततःस्वेकादेशोदात्तउदात्तः॥ वि
श्वा॥ सेच्छंदसिबहुलमितिविभक्तेर्लुक्॥ प्रातिपदिकांतनलोपः॥ स्रंगशिरामि

त्याद्यदात्तः॥ सनानि॥ वनश्रवणसंभक्तौ॥ षणदानेवा॥ करणेघञ्॥ संभज्यंतेभक्तिभूतयादि
पूजानिर्येः श्रवणस्मरणादिभिर्जनैरित्यर्थात्॥ कर्मणिघञ्॥ दीयंतेभक्तेभ्यो भगवंतेत्यर्थो
न्॥ संज्ञापूर्वकविधेरनित्यत्वाद्ध्यभावइतिजीवनं भुवनंवनमित्यमरटीकायांरामाश्र
मः॥ सर्वविधानांछंदसिवैकल्पिकत्वाद्ध्यभावः॥ जित्वांद्याद्यदात्तता॥ जठरेषु॥
खगानामकुर्वीनोर्दीर्घमितिद्विर्नीयोजुदात्तः॥ धेत्रे॥ तिङ्निघातः॥ अंतःफिट्स्वरेणा
नोदात्तं॥ नवाक्॥ णुरुक्तेः॥ ऋदोरप्॥ अनुदात्तोसुपितावित्यपूटापूरू
पामनुदात्तत्वाच्छिष्यमाणधातुस्वरेणाद्यदात्तता॥ चरति॥ तिङ्निघातः॥ प्रत्यु॥
सत्पूर्वेत्यादिनाक्विप्॥ समासांतोदात्तेसतिस्वरमध्योदात्तता॥ १०॥ एवंभक्तेरवश्य रंग्म्
भाविफलत्वमवधार्य श्रवणादिभक्तिमेवमंत्रद्रष्टारऋषयः प्रार्थयंतएकादशया ४०

चरमयर्चा॥ ॥ एवानोअग्नेसमिधाहुधानोरेवत्यावक्षवसेविभाहि॥ वन्वोमित्रोवरुणो
मामहंतामहंतामदितिःसिंधुःपृथिवीउतद्यौः॥ ११॥ हेअग्नेपावकदमदाहकभगवन्पांडु
रंगलिंगवनूरयिवानूलस्मीपतिलाभानाविधानंतद्धनवान पिसमिधेवअस्माभिर्दे
यैनफलादिकाष्ठपर्यंतेनाप्युपायनेनैवेत्यर्थः॥ समित्याणिश्रोत्रियंब्रह्मनिष्ठमित्यत्रो
पायनपाणिरितिव्याख्यानात्॥ चंदनकाष्ठाहिविकारस्यपटवासस्यैवश्रीपांडुरंगेरं
कनाप्युपायनीकरणाच्च॥ हुधानोवर्धमानस्तुष्यन्नित्यर्थः॥ नोस्माकंश्रवसेकृणो
विभाहिस्वरूपेणगुणैश्चप्रकाशमानोभव॥ त्वत्स्वरूपगुणश्रवणेवैमस्मत्कर्णायसदा
भवत्विति प्रार्थ्यात्कीर्तनादिसकलभक्तिहेतुत्वाच्छ्रवणभक्तिप्रार्थनं॥ ननु श्रवणा
पापिवदुमिर्यानलभ्यइत्यादिश्रुतेःपापवासनामलिनस्यसदाश्रवणंकथंस्यान्न

ग्राह्यः॥हेपावकेति॥पुनातीतिपावकस्तत्सम्बुद्धौहेपावकेतिसंबोधनं॥मलक्षालकस्यनवप्रसादकत्वंमलक्षि
ष्टेतिभावः॥भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसंभवादित्युक्तेः॥ननुदेवाराराद्विरूपिणो
विघ्नान्कुर्वंत्ययंह्यत्मानाक्रम्यसमियात्परमितिन्यायेनमुक्तिहेतुभक्तिदानेदेवानसंहरति
तिमन्वानानस्तदनुमोदनंप्रार्थयंते॥तदिति॥नोस्माकंननूश्रवणादिभजनंमित्रादयः
षट्देवामामृहंतांपूजयंतांरक्षंतित्यर्थः॥उनेनिसमुच्चये॥एथिवीचयोश्चेत्यर्थः॥त्रिवि
धाहिदेवनागणोनिरूक्तेउक्तः॥एथिवीस्थानोंतरिक्षस्थानोद्यूस्थानश्चेति॥अन्यस्थानो
भावेनसर्वदेवतानामेत्रेवांतर्भावात्॥तत्रनिघंटोपंचमाध्यायोदेवतानुक्रमणकांडं॥अत्र
त्यध्यायेग्निर्जातोवेदाइत्यारभ्येदेवीरुर्वीहुनीरित्यंतोदेवनागणः एथिवीस्थानः॥वायु
र्रूरूणइत्यारभ्यसविनार्गोभिरित्यंतोंतरिक्षस्थानः॥सूर्यइत्यारभ्येदेवप्यइत्यंतोद्यु

स्थानः॥तत्रमित्रोवरूणादितिरितित्रयमंतरिक्षस्थानगणोवस्यंतत्स्थानस्थानांसर्वदेवना
मुपलक्षणार्थं॥मिंषुःएथिवीतिद्यूस्थानदेवनाग्रहणार्थं॥योरितिलक्षणयाद्यूस्थाना
नांदेवनानांग्रहणं॥यद्यपिएथिवीनिगणत्रयेपिपठ्यतेतथापिद्यूमित्रादिपदैःस्थान
द्वयसूचनात्परिशेषात्तत्रैवोपस्थापकत्वाच्चएथिवीपदंद्यूस्थानदेवनागणस्यैवग्राह
कं॥तथाचषट्देवनाग्रहणेनत्रिलोकीवर्तिनःसर्वेपिदेवनावर्गःसूच्यतइतिभावनादी
यमानश्रवणादिकंसर्वएवेदवारक्षंतित्यर्थः॥यद्वाश्रोत्रेंद्रियस्यसदाभगवद्गुणादि
श्रवणपरत्वमितरेंद्रियदेवनाभिरक्षत्तर्हिंद्रियाणांस्वस्वविषयेषुप्रेरणेविक्षेपसंभवे
नाघटमानमाशंक्यमित्रादिपदसूचिताश्चक्षुराद्यधिष्ठातारःशरीरनिष्ठाःसर्वेदेव
रक्षंतोरक्षंतित्युक्त्याविषयविक्षेपाभावःप्रार्थ्यते॥ ॥अथस्वराः॥एव॥एवादीना

संनदृनि अंतोदात्तत्वं॥निपातस्येतिसंहितायांदीर्घः॥नः॥अनुदात्तंसर्वमपादादाविति
धिकारात्स्मदोदेशोनुदात्तः॥तनू॥फिट्स्वरः॥नः॥अनुदात्तंसर्वमित्यनुदात्तः॥अग्ने॥
आमंत्रितनिघातः॥समिधा॥समासस्वरेऽन्तोदात्तप्रकृतिस्वरेबाधकेबहुलंछंदसीतिशपोलुक्॥
दात्तत्वं॥इधानः॥इधेर्लटोलिकश्चानवा॥बहुलंछंदसीतिशपोलुक्॥चानशोपित्त्वा
र्वधातुकत्वेनउदात्तत्वाभावः॥लसार्वधातुकत्वाभावेनानुदात्तत्वाभावेचित्स्वरेप्रकृत्या
नुदात्तत्वं॥रेवत्॥धनवाचकादूयिशब्दान्मतुपू॥रयेर्मतोबहुलमितिसंप्रसारणं
छंदसीरदृनिमस्यवः॥रत्नाधाःत्रेनिमनुवुदात्तः॥रूपांरूपंखलुगिनिप्रथमायालुक्॥प
वक॥आमंत्रितनिघातः॥श्रवसे॥श्रःश्रवणे॥करणेऽसुन्॥नित्त्वादाद्युदात्तता
वि॥निपातआद्युदात्तः॥मा॥हि॥निदुःनिघातः॥मित्रः॥फिट्स्वरः॥वरुणः॥उनर्व

न्नेनानामित्यादिरुदात्तः॥मामहंना॥महपूजायां॥णौवाद्यः॥लोटआत्मनेपदं॥बहुलं
छंदसीतिशपोलुक्॥तुजादित्वादभ्यासस्यदीर्घः॥सर्वविधानांछंदसिवैकल्पिकत्वादद्
भ्यस्तादित्योदात्तप्रकृतिः॥निदुःनिघातः॥अदितिः॥दोअवखंडने॥स्त्रियांक्तिनिकमि
णिक्तिन्॥शुस्यतिमास्थामिनिक्तिनीतिधानोदित्वं॥नेनान्नूतनपुरुषेअखंडनीयादे
वनादेवमानारब्धव्यर्थः॥अव्ययपूर्वपदप्रकृतिःस्वरः॥सिंधुः॥स्यंदूप्रस्रवणे॥निदि
त्यनुनासिकेत्क्नौस्यंदेःसंप्रसारणंधश्चेतिउप्रत्ययोधकारानादेश्च॥नित्त्वादाद्युदात्तः॥पृथि
वी॥प्रथेषिवनूसंप्रसारणंचेतिषिवनूप्रत्ययः॥षिद्गौरादिभ्यश्चेतिङीप्प्रत्यय
स्वरेणोदात्तः॥उन॥स्वरादित्वान्प्रातिपदिकस्वरेणानोदात्तः॥र्यौः॥प्रातिपदिक
स्वरेणानोदात्तः॥ ११ ॥इत्येकादशर्चंसूक्तंश्रीविठ्ठलेश्वरतापरंव्याख्यातं॥ ॥

अथापश्यंगोपादितिमंत्रोव्याख्यायते॥अपश्यंगोपामनिपद्यमानमाचपराचपथिभि
श्चरंतं॥ससध्रीचीःसविषूचीर्वसानआवरीवर्तिभुवनेष्वंतः॥ १२ ॥अयंमंत्रोत्सवा
मीयसूक्तस्थः॥अस्यनात्पर्यवेदभाष्ये॥ज्ञानमोक्षाक्षरब्रह्मसंप्तिसर्वानुक्रमार्थी
सर्वानुक्रमार्थवर्णनप्रसंगेमाधवाचार्याआहुः॥अपश्यंगोपामित्यादिनाब्रह्मसा
क्षात्काररूपस्यज्ञानस्यब्रह्मप्राप्तिसाधनत्वेनब्रह्मणःश्रीकृष्णस्यसाक्षात्कारब्रह्मप्रा
प्तिप्रतिपाद्यनरूपितवर्ण्यतेन॥दीर्घतमाऋषिराह॥पथिभिर्नानाविधैर्मार्गैर्गोचारणा
यकोमारावस्थायामाचरंतंचरंतंवृंदावनोद्देसंचारंकुर्वंतंननंदनंयोगंडकेवयसि
पंचाचरंतंचपराकृगोवर्धनाद्रिशिखरादेसंचारंकुर्वंतंचेत्यर्थः॥चकारद्वयमुभयोः संभू
चारयोःप्राधान्यार्थंयद्गन्येचप्रजापतयेचसायंजुहोतीत्यादिवत्॥गोपांगोपालं ४३

श्रीकृष्णंअनिपद्यमानंपदगतोहिवादिःकाप्यगछंतंश्रीपुंडरीकप्रार्थनावशादेकत्रैवति
ष्ठंतमहमपश्यंदृष्टवानस्मीतियेनाहंदीर्घतमाआसंतस्यदीर्घस्यानादेस्तमसोमूला
ज्ञानस्यनाशकदर्शनसंपत्याद्यममहद्भाग्यमितिभावः॥तयाच स्कांदमाहात्म्ये॥
अनेनचारुरूपेणचारुहासावलोकनः॥लोकानामिहतान्कामान्दास्यन्तिष्ठत्वमत्र
हिरितिपुंडरीकप्रार्थनोमुनिनंदनरंदेवानामपिसर्वेषामुन्मोहंस्वतंत्रतः॥वत्स्यामिसर्व
दात्रत्वंक्षेत्रेत्वन्नामसंस्तकरुतिभगवद्धरप्रदानंश्रुत्वादेवाऊचुः॥यत्तंदेवामहात्मान
सुतयःस्मृतयस्तथा॥नविदुस्तंनृलोकस्यस्थानवानदृष्टिगोचरं॥ददातियन्नरःकामा
नाश्रितानानानमुक्तिदः॥पुंडरीकाख्यसुतरःसर्वेषांमुक्तिदोनृणामिति॥स्यष्टप्रतिपत्य
र्थंमुनरार्घनस्वरूपंवर्णयति॥सप्तभुवनेषुचंद्रभागानीथोदकेषुजीवनंभुवनंवनमित्य

भिधानात्॥ अंतः अभ्यंतरे आच्छन्नतीर्थमूर्तिरूपेणावरीवर्ति भृशंवर्तते॥ किंचसः सप्रीचीः स
हांचतीः विषूचीर्विविधंगछंत्यः प्राच्याद्यामहादिशाकोणदिशश्चेत्यष्टमाष्टकेवेदमाध्य
कारः॥ नादिशोवसानः परिधानंकुर्वन् दिगंबरः संन्नित्यर्थः॥ भुवनेषुलोकेषु अंतर्मध्ये
भूलोकेपौंडरीकक्षेत्रे आवरीवर्तिसर्वोत्कर्षेणेदानीमपिवर्तते॥ वसामिनीर्थमध्येहंक्षेत्र
मध्येनैर्थवचेतिस्कांदमाहात्म्यात्॥ अहोसर्वे पिमुमुक्षुजनाःस्वदर्शनेननरुनछत्यत
महमिवसंपादयेतनिमुन्यभिप्रायः॥ तत्रनीर्थमूर्तेर्दर्शनंमनसैवमूर्तिरूपत्वेनतुन्ना
॥ ध्यानंनीर्थे स्थितंविष्णुं दृष्ट्वा क्षेत्रस्थमुत्तमं॥ सर्वान्कामानवाप्येहसायुज्यंलभतेहरे
रितिनैत्रेयोक्तेः॥ दिगंबरत्वमृषिस्कांदेउक्तं॥ यत्रचास्तेरमानाथः शंखपाणिर्द्विबाहुकः रांमू
॥ कटिसन्यस्तहस्तश्चवक्त्रकंजेन॥ दिगंबरः॥ मकराभ्यांकुंडलाभ्यांचसंछन्नमुखपंकजः ४४

स्फुल्लकाविक्यपुंडरीकेणक्षेत्रपालेनसंयुतः॥ गो
पयष्टिंसमाक्रम्यस्थानानंदैकविग्रहइत्यादि॥ अत्रससप्रीचीःसविषूचीरितिनछेदस्य
पुनरुपादानमावरीवर्तिभुवनेषंतरितिनवनुर्यादस्यादित्यावाक्येभेदसूचनार्थं॥ अत्र
चंद्रलोहितीमाहात्म्ये॥ मीमासरिद्वर्णनप्रस्तावेउक्तं॥ तत्रैवपष्टमकानिपद्यानि॥ पांडु
रंगेमहापुण्येसेवपुण्यतमास्मृता॥ तत्रस्नानेननदानेननरपैणाननराभुवि॥ अस्मिन्न
वाप्यसौ भाग्यंममुष्मिन्यातिसद्गतिं॥ अपहायपरंधाम भगवानादिपूरुषः॥ गोप
गोपीजनानंदसंदायकदृगंचलः॥ कमलावल्लभोदेवः करुणारसवारिधिः॥ चंद्रभा
गातटेयत्रपुंडरीकेणसन्निधौ॥ आवरीवर्तिभुवनेषंतरिंगलसछिराः॥ सप्रीचीः
सविषूचीश्चवसानःकुरुनोदृशं॥ तत्रभीमरथीतीरेमध्याह्नेत्रिदशैःसह॥ कदाचि

दृपिमज्जोरदत्येवहिसंपदं॥पांडुरंगस्थलेनस्माव्यराजासासरिद्वरेनि॥अत्रलिंगाल
मदित्यस्यशिवलिंगमिवत्रोन्ननंशिरोवर्हादिभूषणवत्त्वाद्यस्यसरत्यर्थः॥शेषंस्पष्टं
रायविष्णोर्व्याख्यातंतन्माहात्म्यटीकायामतस्तत्तएवज्ञेयं॥ननुअसौवाआदित्योगो
पाःसहीमाःप्रजागोपायतियतीत्यादिनैतिरीयब्राह्मणादिषयंमंत्रआदित्यादिपरत
यावाख्यातस्तत्कथमत्रश्रीविष्णुव्याख्यापरतयाव्याख्यास्यतेब्राह्मणव्याख्यानस्यापो
रुषेयत्वेननद्विरोधस्यव्याख्यानस्या×विष्णु×प्रामाण्यापातादितिचेन्मैवं॥ब्राह्मणव्या
ख्यानस्यापलक्षणाभूतत्वेनेतरव्याख्याननिरासकत्वाभावेननद्विरोधापातात्॥त
स्ययंमंत्रस्त्यमेवव्याख्येयइतिब्राह्मणेननियम्येत॥प्रमाणाभावात्॥तथात्वेवेद्या
ष्टमाष्टकेस्ययंमंत्रस्ययद्गोपावारीरस्यगोपयितारंप्राणमित्यादिकस्यश्रीमा

धवाचार्यकृतद्वितीयव्याख्यानस्याप्रामाण्यापत्तेः॥अतएवास्यवामस्येतिसूक्तव्या
ख्याने अस्यवामेनिरूक्तमादित्यपरतयाव्याख्यायपश्चाद्ध्यात्मपरतयापिव्याख्या
यभाष्यकाराआहुः॥एवमुत्तरत्राप्यध्यात्मपरतयायोजयितुंशक्यंतथापिविस्तर
भयान्नलिख्यतेइत्यादि॥तेनात्यमंत्रस्यापिनदंतर्गतस्यव्याख्यानांतरमध्यात्मप
रंध्वन्यते॥नाद्यानियमस्वीकारेस्यभाष्यस्यासंगतिःस्पष्टा॥अतएवैकस्यमंत्र
स्यैकएवार्थइत्यपिननियमः॥अस्यवामीयसूक्तादिषुनिरूक्तव्याख्यात्वव्याख्या
दिभेदेनानेकार्थानांभाष्यप्रदर्शनात्॥चत्वारिशृंगेतिमंत्रस्यसमहत्तश्चतुःशृं
गइत्यादिमुनिवाक्येरग्निपरतयाव्याख्यानात्निरूक्तयास्कपरतयाव्याख्यानात्
व्याकरणभाष्यभगवतानंतेनव्याकरणशास्त्रस्वरूपवर्णनतेयोपरेव्याख्याना

त्र॥एवमुक्तःपरयन्नुक्तदेवोऽसिवक्तृऐत्यादिषूदाहार्यं॥व्याकरणवेदार्थज्ञयोः प्र
शंसनपरतयाव्याख्यानात्॥एतेनवेदभाष्यमाधवाचार्यैरेतेषांमंत्राणांमन्त्रा
दित्यादिपरतयाव्याख्यानाद्दुरवद्दिदुलपरतयाव्याख्यानमिदमप्रमाणमि
तिनिरस्तं॥भाष्यव्याख्यानस्यापलक्षणरूपत्वात्॥विस्तरभियैकैकार्थप्र
दर्शनेनार्थीतरागात्यागात्॥सर्वार्थप्रकाशकस्यानादेरपौरुषेयस्यवेदस्या
धुनिकपौरुषेयव्याख्यानरूपभाष्येणार्थयतानियमनासंभवात्॥अल्पज्ञे
दानींतनश्राद्धर्षादिकविप्रणीतकाव्येष्वेनेकार्थाहदर्शनेनानादिसर्वज्ञेश्वरप्रणी
तवेदभाष्यकारप्रदर्शितःकश्चनएकएवार्थइतिसंकोचनियमस्यानोचित्यात्च रांम्
॥इत्थमेवहिशास्त्रेयोनित्वादित्यधिकरणेश्रीभगवत्पादैरुक्तंभूतभविष्यदादि ६६

सर्वज्ञगत्यकाशकत्वेनसर्वज्ञकल्पत्वंवेदस्यनिर्वहेत्॥सर्वप्रसिद्धानांशिष्टपरिगृहीतानां
तत्तद्देवतास्थानानांतीर्थादीनांचाप्रकाशनेनवेदस्यसर्वप्रकाशकत्वेनसर्वज्ञकल्पत्वस्य
बाधापत्तेः॥नचवेदस्वरूपस्यानंतत्वान्नस्यचेदानींमुच्छिन्नत्वादुच्छिन्नवेदभागएवतत्त
द्देवतादिप्रकाशकोस्त्विति॥वाच्यं॥विद्यमानवेदभागस्यप्रकाशकत्वासंभवेऽच्छिन्न
भागस्यतत्प्रकाशकत्वकल्पनेनोचित्यात्॥कृतयुगेप्रणीतात्मकस्यैववेदस्यसर्वप्रका
शकत्ववत्कलियुगेवशिष्टवेदभागस्यैवसर्वप्रकाशकत्वसंभवात्॥उच्छिन्नवेदभाग
स्यतत्तत्स्मृत्याचारमूलत्वकल्पनंनुविद्यमानवेदभागेसर्वेषांतत्तन्मूलत्वप्रतीत्यभावा
त्समुच्छिन्नवेदभागेमंदमतीनामपितन्मूलप्रतिपत्तेः॥प्रणेतृजीवब्रह्मैक्यार्थस
त्वेपिप्रज्ञानंब्रह्मतत्त्वमसीत्यादिवाक्येष्विवसर्वेषांतत्तत्पित्यभाववत्॥विद्यमानवे

दभागेतनन्यूनत्वप्रतीत्यभावोपपत्तेः॥किंचमाधवकृतवेदभाष्येऽयंकोऽर्थप्रकाशनपूर्वं
कमर्थांतरोपलक्षणाकत्वमवश्यमुररीकर्तव्यं॥केतुंकृण्वन्नूतयेऽपेशसेसमुषद्भिरजायथाऽग्ने
र्थाउद्बुध्यत्वमित्यादिमंत्राणांभाष्यंदर्शाग्न्यादिपरैरेकोऽर्थस्तेवव्याख्यानात्॥ग्रह
मरवेस्मृतिकोरैःकेतुशुक्रोभौमबुधादिग्रहहोमादौविनियुक्तत्वेनकेत्वादिग्रहप्रका
शकत्वावश्यकतयावश्यवक्तव्येकेत्वादिग्रहप्रतिपादनपरव्याख्यानांतरस्याभावाद
॥नचेहोमादौविनियुक्तानांमंत्राणांमदृष्टार्थत्वान्नतेदेवताप्रकाशनरूपदृष्टप्रयोज
नायसंतेवपिनस्मृतिर्विनियोगानुपपत्तिरितिवाच्यं॥पूर्वमीमांसायांमंत्राधिकरणेक
र्मस्वविनियुक्तानांमंत्राणांदेवतादिप्रकाशनरूपंदृष्टंप्रयोजनंमंत्रपाठनमदृष्टे
कप्रयोजननेनिसिध्यतिनतत्वात्॥तथाचतदधिकरणेऽर्थसंग्राहकोमाधवीयश्लोकः

रांमू ६७

मंत्राउक्तप्रयत्नेतिकिमदृष्टैकहेतवः॥योगेषूनपुरोडाशाप्रयनादेस्वयंकाः॥१॥ज्ञात्वे
नापिनद्रव्यानांमंत्राःपुरोडाशादिवाचकाः॥ननज्ञानस्यदृष्टत्वादृष्टंवरमदृष्टनत्॥२॥एवमाग्नः
प्रजांजनयतुप्रजापतिरित्यादिमंत्रेष्वप्युदाहार्यं॥आनःप्रजामेषोरक्षरिमां
त्वमिंद्रसंसृजाशाश्वतरइतिमंत्रचनुष्टयंहिअनुक्रमणिकायांऽसूर्यासावित्रीदेवताकत्वे
नोक्तंसूत्रकोरेणभगवताश्वलायनेननगृह्यप्रवेशनीयहोमेविनियुक्तं॥तत्रानुक्रमणिको
क्तसूर्यासावित्रीदेवताकत्वयतिपनेयप्रजापत्यादिपदानिसूर्यासावित्रीदेवतापरत्वेन
व्याख्येयानि॥योनेनोच्यतेसादेवतेत्यनुक्रमणिकावाक्यादाहरणेनेनतत्कोपक्रमेयो
र्थःप्रतिपाद्यतेनसएवदेवतात्वेनविज्ञेयइतिभाष्यकोरोक्तः॥नचैवंभाष्यकोरव्याचख्यो
प्रजापतिर्देवतरहितेहवपूर्वमघोरचक्षुर्भवेत्यादिव्याख्यानात्॥हेसूर्यासावित्रीत्वमि

त्यादिव्याख्यानरूपोचित्यात्॥तस्मान्माधवाचार्यभाष्यमर्थानुरोपलक्षणपरंनत्वर्थपरं
नानियमपरमित्यवधेयंवाच्यं॥तथाचश्रीरामरक्षाभाष्यमहामुद्गलाचार्यैः पूर्वापरं
चरतद्दृतिमंत्रद्वयंश्रीरामचंद्रपरतयाव्याख्योयेनडंकासमाधानाभ्यांस्पष्टीकृतं॥नच
नयोर्मंत्रयोर्भाष्यकारादिभिरन्यथाव्याख्यानात्तादृसांप्रदायीकायंव्याख्यातिमंतव्यं॥
चत्वारिशृंगेतिमंत्रस्यतैर्यज्ञकालादिपरतयाव्याख्यानेपिहानुरोध्यविधुवितिनियु
क्तखानद्दनुरूपायाव्याख्यायाएवोचित्यवत्त्वापन्यव्याख्यायाउचितत्वात्॥नथा
त्रदिंनियामकमितिचेत्॥अभिधानसामर्थ्यमेवत्यत्रहेतुर्मुद्गलाचार्यग्रंथः॥एते
नानुक्रामणिकावंडयोमंत्रोयेद्दवताकत्वेनोक्तत्वेद्दवता×हि×परतयैवसमंत्रोव्या
ख्येयोविनियोगानुसारेणव्याख्येयइत्यादिनियमोपिनिरस्तः॥अस्यवामीय

सूक्तादिभाष्येषुबहुशउक्तनियमद्दयव्यभिचारदर्शनात्॥अतएवचतुर्धरोपनामैके
नीलकंठमेदृर्कदुमंत्रानुष्टुत्यरचितेमंत्रभागवतमंत्ररामायणाख्यग्रंथद्दयेबहु
शोमंत्राःश्रीकृष्णलीलापरतयाश्रीरामलीलापरतयाचव्याख्याताः॥तत्रग्रंथद्दये
पिभाष्यव्याख्यानमतिक्रम्यपरमेश्वरपरतयाव्याख्यानंयुक्तमभित्युपाद्दतिवि
स्तरेणनिरूपितं॥संक्षेपतस्तदर्थउच्यते॥सर्वेषांमंत्राणांविष्णुपरत्वंमुख्यक्रियादि
परत्वंतुतेषांगौणोपचारिकं॥मंत्रगतपरमेश्वरलिंगानांक्रियांगदेवतादोषासंजस्ये
नान्वयायोगात्॥तत्यग्निमीळेपुरोहितमितिमंत्रेग्नेर्यत्समाम्नेदेवपदेनसंप्रदान
त्वमृत्विजमितिकरणत्वंहोतारमितियजमानत्वंरत्नधातममितिफलदातृत्वमि
त्यायुच्यमानंमुख्यमीश्वरंउत्क्रम्यक्रियांगेसौविष्टकृत्यांयाज्यायांविनियुक्तस्या

रग्निपरतयाब्राह्मणविदुर्वास्यानमप्योजस्त्वेनोपपद्यते॥परमेश्वरस्त्वेवसर्वात्मकत्वा
त्फलमतउपपत्तेरितिन्यायेनफलप्रदत्वाच्च॥अग्न्यादीनांबहूनांपरमेश्वरत्वासं
वाच्च॥एवमिषेत्वेत्यादिमंत्रेपिदृश्यमाणेतत्तत्फलार्थंतांप्राप्नवानात्यर्थादधिका
रिभेदेनाध्यमाणार्थानांभेदान्मुख्याधिकारिणिमुक्तेहैकैवल्यप्रदत्वंकैवल्या
र्थंसानेनाप्नवानोतिस्वर्गकामेधिकारिणिहस्वर्गप्रदत्वंस्वर्गार्थंकर्मणाप्राप्नवानो
तिदृषेत्वेतिनिरासस्तामाछिनत्तिअन्तंवायदृषदंतिब्राह्मणानुसारेणचेहग्रारेवत्तामन्त्रा
यछिनत्तीत्यादयोर्थाः॥तत्रपूर्वपूर्वापेक्षयोत्तरोत्तरोर्थोगौणः॥परोक्षकृत्यांकर्मस्त
मृध्यर्थंनदर्थप्रतिपादनात्॥परोक्षप्रियावहिदेवाकृत्यादिश्रुतेः॥मुख्यकृत्याप्रय रांम्
ज्यार्थेनात्पर्यात्॥परोक्षवादोवेदोयंबालानामनुशासनं॥कर्ममोक्षायकर्मणि २८

विधनेत्यगदंयथेतिश्रीभागवनाद्धकन्यायेनपरमेश्वरत्वरूपेस्थेवसर्वत्रविवक्षणात्त
त्तन्मंत्राणांत्वारसिकमीश्वरपरत्वंसर्ववेदायत्पदमामनंतीतिश्रुतेश्चतत्समन्वा॥
क्रियापरत्वनुविनियोगवशाज्जपन्यरत्वेनि॥तेत्स्यान्नयोदेवानांनामधाएकएवे
तिश्रुतेश्चेतत्सिद्धं॥यत्किंचिदेवतोमंत्रोविष्णुलोपहृतः॥वेषवःसयनोविष्णुः
सर्वदेवतनामभृदितिं॥ननुतत्तन्मंत्रस्यकर्मणिविनियुक्तस्यकर्मसमवेनार्थानांद्रव्य
देवताकर्मणांबोधकत्वंपरमेश्वरबोधकत्वंचेतिनानार्थत्वेकिंमानमितिचेन्न॥
श्रुतिरित्येवेहि॥एतद्वैयत्तत्यसमृध्यंयद्वपसमृध्यंयत्कर्मक्रियमाणंमृगमिवदतीत्ये
तिरयब्राह्मणवाक्यात्॥ऋगादिमंत्रःकर्मसमृध्यर्थंक्रियमाणंकर्मवदतीतिप्रमीय
ते॥ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः॥यस्तन्नवेदकिमृचा

करिष्यतीतिऋनेनब्रह्मपरत्वमपि॥यस्मिन्सर्वेदेवाःप्रतिष्ठिताःतस्मिन्परव्योमन्यक्षेत्रेअक्षरे विनाशरहितेब्रह्मणिसर्वान्कामान्चोवर्तते॥ऋक्सामाभ्यांयजुर्मंत्रस्योपलक्षणं॥ योध्येवानद्वह्मनवेदसऋचाकर्ममात्रवेधिकयाकिंकरिष्यतिनकिमपिज्ञाश्चनफलाति॥श्रुत्यर्थात्॥नचब्रह्मपरत्वमसङ्गतंविष्वादिपदवाच्यपरमेश्वरपरत्वमितिवाच्यं ब्राह्मणएवेश्वरत्वात्॥ब्रिंवभूतंब्रह्मैवेश्वरइतिसिद्धांतात्॥मायाप्रतिबिंबईश्वरइति मतस्यबालबोधनार्थमेकदेशकथनायाकैवल्यरत्नात्॥तथासर्वेवेदायत्पदमामनंतितपांसिसर्वाणियद्वदंतितद्वांछंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीमीतिचयोदेवानांनामधाएकएवेत्यादिश्रुतिरपिमानं॥ननूक्तरूपतिबलात्परमतात्पर्यब्रह्मण्यस्तु॥कर्मणोपयोगःकरणाकांक्षार्थतयाब्रह्मज्ञानोत्पादनद्वाराब्रह्मप्राप्त्यर्थत्वात्॥सर्वापेक्षाचयज्ञादिश्रुतेरश्ववदितिपारमर्षसूत्रात्॥ रांमू० ५०

अवांतरतात्पर्यनुद्दाल्यादिदेवतात्ववमुक्तं॥अन्यथाव्यवस्थाभावापत्तेः॥नथोचेद्वाल्यादिप्रतिपाद्कोमंत्रःकथं॥परब्रह्मविष्वादिवाचकःस्यात्॥हंतद्वांतरतात्पर्येणापिनपरत्ववर्णनेश्रुतिपीडाकर्मकांडेऽदृश्यस्यात्॥किंचैकवाक्यस्योनकार्थतास्यात्॥तावन्नन्याय्या॥ऋचोअक्षरेत्यादिश्रुतयःकर्मादिपरंपरयापिनत्परत्वोपपत्तेर्नकर्मसुविनियुक्तमंत्राणांकर्मप्रतिपाद्नेननिराकांक्षाणामवांतरतात्पर्येणापिब्रह्मपरत्वप्रमाणानावमजनीनिचेन्॥मैवं॥प्रतिपन्नपुरुषोद्देनार्थप्र.ती[illegible]निर्भद्दर्शनस्योक्तत्वात्॥अतएवयात्कोबहुप्रजानिर्ऋतिमाविवेशेत्यादिमंत्रेषुबहुप्रजाःहेऋमापद्यतइतिपरिव्राजकाद्यनिब्रह्मज्ञानाधिकारिणोगर्भवासादिसंसारक्लेशाप्रतिपाद्नपूर्वकंतत्क्लेशापरिहारायात्मज्ञातव्यइत्यर्थस्यप्रतिपादनाय॥अन्यस्यत्रेवर्गिकाधिका

रिणत्वर्षकर्मनिनेरुक्तावहुव्रत्रा भूमिमापद्यनइत्यादिनायंनरप्रतिपत्तिमाह्॥एवंवि
दूरविदूरेदेनभाष्यकारोपिबहून्मंत्रान ध्यात्मपरनयानत्रेश्वनापरनयाचास्यवा
मीयसूक्तव्याचख्ये॥नयाचयायानिर्क्रत्यादिपदानिननदधिकारिभेदेनदुःखाद्यर्थ
म्याद्यर्थानूप्रतिपादयंतिनचनत्रानेकार्थनादोषःनवाकर्मकांडोक्तेरुद्रदधिकारिणंप्र
तिकर्मोपयुक्तार्थस्यापिबोधनात्तथाग्नीप्रातिपदान्यपिप्रतिपत्तभेदेननानादेवतां
तनद्रामरुष्णादिस्वरूपंचप्रतिपादयंतीतिनकश्चिद्दोषः॥तत्रसर्वत्रपरमेश्वरप्रति
पादनपरोर्थोमुख्यः॥मोक्षंप्रतिसन्निहितत्वेनोपयुक्तान्॥कर्मादिपरस्तुपरंपर
यामोक्षपरत्वात्मुख्यः॥किंचेश्वरपरत्वंमुख्ययाहत्यासंभवति॥देवतादिपरत्वंतु रांम्
लक्षणादिनेत्यमुख्यएवेत्यायर्थः॥हरयेनेहिलिंगादिबलादिंद्रादिपदमुख्यलक्षणा ५१

गौणभेदेनत्रिधार्थप्रतीतिः॥इंद्रोमायाभिःपुरुरूपईयतइत्यादिषुपरमेश्वरलिंगानत्परत्व
मुख्ययाहत्या॥नमिदंद्रसतमिंद्रइत्याचक्षतइतिश्रुतेरिंद्रपरमेश्वर्यनिस्मृतेश्च॥अ
पांफेनेननमुचेःशिरइंद्रोदवर्तयदित्यादौदेवतालिंगाच्चोपनिषत्परत्वलक्षणया॥अ
त्रपारमेश्वर्यलक्षणमुख्यार्थस्यासंभवात्॥ऐंद्राग्नाहिपत्यमुपनिष्कामतइत्यादौश्रुति
नियोगबलात्तद्गार्हपत्याग्निपरत्वमिंद्रपदस्यगौण्यैति॥ननुप्रचुरतरप्रयोगादिंद्र
वाय्वादेःवायोपनोरूढेःपरेमेश्वरेयोगिकरूढिर्योगमपहरतीतिन्यायेनवायो
निपरत्वमेवमुख्यमास्मामितिचेन्न॥लिंगबलात्प्रतीयमानपरमेश्वरपरत्वस्यैव
मुख्यत्वोचित्यात्॥सर्वाणिहवारमानिभूतान्याकाशादेवसमुत्पद्यंतइत्यादिषुआ
काशप्राणादिवाक्येषुहिभूताकाशवाय्वादिषुरूढेराकाशप्राणादिशब्दःसर्वेभूते

पादानत्वादिलिंगाद्ब्रह्मपरश्रुतिवाक्यस्थब्रह्मपरत्वमासमंतात्कारणेत्प्रकारणेत्यादि
योगेनमुख्यमेवेतिआकारात्लिंगादतएवप्राणइत्याद्यधिकरणेप्रतिपादनात्॥त
स्मादस्तिप्रतिपत्तृणामधिकारिणोभेदादर्थभेदोमंत्राणां॥नस्तिस्तिंविद्वद्दृष्यासासा
न्मंत्राणांपरब्रह्मविष्ण्वादिपरत्वं॥अविद्वदधिकारिदृष्यानुसारात्कर्मपरत्वंपरंप
रयाब्रह्मपरत्वमिति॥नथाचात्रमंत्रसामायणेपोद्घातोपसंहारउक्तार्थसंग्राहका
श्लोकाः॥सर्वासांदेवतानांयन्नामभीरामउच्यते॥अनन्तासांसत्यतिभीरामस्तत्ति
रसंज्ञायं॥बलवद्रामलिंगाद्धायस्तिंविद्देवतामृचं॥रामायणानुसारेणव्याकुर्व
न्नेवदुष्यति॥विनियोगानुगोगोण्योवेदंव्याचष्टभाष्यकृत्॥नत्वानुगोमुख्यवृत्त्या
व्याकुर्वंयात्कवत्वहमिति॥अत्रसर्वत्रपुनरुक्तत्वनद्वेधार्थसंग्रहरूपत्वान्नदूष्यक

रांम्
५२

त्वमित्यवधेयं॥नथाचात्रचतुर्धरनीलकंठाद्यपपादितानुसारेणद्वेविरूपेइत्यादिमंत्रा
णांभाष्यकृदुक्तादन्यादित्यपरव्याख्यामतिक्रम्यलिंगाच्छ्रीमद्विठुलदेवतापरत्वेनव्या
ख्यायायुक्ततरत्वंसिध्यं॥लिंगानांनानत्वनत्वव्याख्यानकालएवप्रदर्शितत्वात्॥किंच
सामर्थ्यलिंगमितिलिंगसामान्यलक्षणं॥प्रकृतेश्रीविठुलरूपद्वयपुंडलीकादि
महिमप्रतिपादनेद्वेविरूपेवत्समित्यादित्रयाणांसामर्थ्यस्यस्पष्टत्वादेषांमंत्रा
णामर्थप्रकाशनसामर्थ्यलक्षणेनलिंगेनश्रीविठुलमूर्त्यादिप्रकाशकत्वमुपप
न्नं॥नचैवंवेदभाष्यातिक्रमेणग्रहसामर्थ्यरूपलिंगमात्राश्रयेणऋत्यर्थवर्णी
यित्वात्मिमनार्थस्यदेवतादेर्वैदिकत्वेनोपादेयत्वस्यापेनचार्वाकायुभिमतोय
र्थस्तन्नदनुकूलऋत्यर्थवर्णनेननवैदिकउपादेयश्चस्यात्॥व्यवस्थाहेतोर्वेदभाष्य

सेतोरनंगीकारात्॥नचाचासंदेहवेदमूलआसीत्सएषपुरुषोऽन्नरसमयइत्यादिश्रुतीनांचार्वाकादभिमतार्थवर्णनेननस्त्यवादेहात्मवादादीनांवेदिकत्वापादयत्वेस्यातामितिशंकनीयं॥पुराणवाक्यनिकरस्यशिष्टाचारस्यचव्यवस्थाहेतोरंगीकारेणतच्छंकितस्यचार्वाकाद्यभिमतार्थवेदिकत्वादुनिप्रसंगस्याप्रसंगात्॥सर्वेहिव्यासस्मृतिपुराणानुसारेणस्मृतिपुराणवाक्यनिकरस्यमूलत्वसंदेहेशिष्टाचारानुसारेणवेदमंत्रेव्याकुर्वन्तोऽतिप्रसंगदूषणेनदुष्यन्॥नहिचार्वाकाद्यभिमतोर्थःस्मृतिपुराणप्रमितानवाशिष्टपरिगृहीतः॥अतःश्चार्वाकाद्यैःस्वाभिमतोर्थस्वकल्पितेनयोजनयाश्रुतिप्रतिपाद्यत्वंवर्णनेपिनोपादयत्वंसिद्धिः॥यश्चार्थःपुराणवाक्यसंवादीशिष्टाचारपरिगृहीतोवातस्यनस्यश्रुतिमूलत्वम



वश्यंवक्तव्यं॥तत्रप्रत्यक्षदृष्टवेदवाक्यानांमूलत्वसंभवेनुमेयानांमूलत्वकल्पनंनन्यायमित्युक्तरीत्याभाष्यमतिक्रम्याधिकारिभेदेननानाकार्यबोधकत्वांगीकारेणदृष्टवेदवाक्यानामेवनत्परत्वं॥वक्तुंयुक्तं॥अतएवश्रीकृष्णरामलीलानांसर्वपुराणप्रतिपाद्यानांप्रत्यक्षवेदमूलत्वायऋङ्मंत्राश्चनुर्यरेसंक्षेपलीलापरतयाव्याख्याताः॥प्रकृतेनचश्रीमद्विठ्ठलेश्वरैतावतीर्थादेःपुराणप्रतिपाद्यत्वंस्पष्टं॥तथाहि॥ब्रह्मांडपुराणेगस्त्यनारदसंवादेनदीक्षेत्रेस्नानप्रकरणे॥शालग्रामंचवेदाद्रिंनरनारायणाश्रमं॥हृदावनंचकेदारंहरिद्वारंचगोकुलं॥शृंगाकुलंचश्रीकूर्मंपांडुरंगंचपीठरं॥अहोबलंजगन्नाथंवेंकटाद्रिंचनेमिशमित्यादि॥तथागरुडपुराणेऽष्टोत्तरशतश्रीभगवत्क्षेत्रव्यक्तस्थानवर्णनाध्याये॥अहोबलेगारुडोद्रेहिरण्याक्षरमर्दने॥विठ्ठलंपांडुरंगंतु

वंकटाद्रेरमासखं॥ नारायणेयाद्वोद्रोन्मिंहघटिकाचले॥ वरदंवारणगिरौकांच्यांक
मललोचनमित्यादि॥ अयमध्यायोरामानुजाख्यश्रीवैष्णवसंप्रदायसिद्धः॥ अथशिव
गीनाम॥ अविमुक्तेद्वारकायांश्रीशैलेपौंडरीकके॥ देहांतेनारकंब्रह्मलभंतेमदनुग्रह
दिनि॥ अत्रपौंडरीकेइत्यस्यपौंडरीकमितिसंज्ञितेपांडुरंगक्षेत्रेइत्यर्थः॥ संज्ञायां
कन्॥ स्फोदेपुंडरीकमुनिनाम्नाक्षेत्रनामप्रसिद्धेरवरदानादिदर्शनात्॥ तथाचमना
भेवमंवेक्षेत्रेविख्यातंस्करपूजितमितिपुंडरीकाख्यनंतरंवक्ष्यमिसर्वदाब्रह्मन्क्षेत्रे
वन्नामसंज्ञकइतिभगवदुक्तिः॥ यत्तुकश्चित्पौंडरीकपदेनव्याघ्रपुरारव्यंशिवक्षेत्र
मित्याहतन्न॥ शिवपुरेस्थेवग्रहणंनपांडुरंगक्षेत्रस्थेत्यत्रविनिगमनाविरहात्॥ रांम्
ननुतत्रापयग्रहणमस्तितिचेन्न॥ इष्टापत्तेः॥ पौंडरीकेतिवक्तव्येपौंडरीकके ५४

इत्येकवचनस्यजात्यभिप्रायेणोपपत्तिसंभवात्॥ यदितुजात्यभिप्रायेणोपपादनेकृ
तार्इत्यकस्येवग्रहणंयुक्तंतर्हिपांडुरंगक्षेत्रस्येवग्रहणमस्तु॥ ननुपांडुरंगस्येवग्रहण
मपिविनिगमकाभावस्तुल्यइतिचेन्न॥ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानिर्मा
णांसाप्रसिद्धिषट्प्रमाणांतर्गतस्थानप्रमाणस्यविनिगमकस्यसत्वात्॥ तथाहि॥
अत्रवाक्येविमुक्तेपदाभिधेयद्वारकाख्यशिवपुर्यनंतरंद्वितीयस्थानेद्वारकाख्य
विष्णुपुर्युच्यतेतत्रमानंश्रीशैलाख्यशिवपुर्यनंतरंद्वितीयस्थानेपौंडरीकपदेनपां
डुरंगक्षेत्ररूपविष्णुपुर्याभिधानस्यन्याय्यत्वात्॥ किंचसर्वत्रप्रसिद्धेयाद्वारकावारा
णस्यारव्योपादानेनातत्रापनार्थंयुज्यतेकिंनुदृष्टांतव्यंजनार्थं॥ तथाचयथावारा
णस्यांशिवपुर्यांनारकोपदेशस्तथेवश्रीशैलाख्यशिवपुर्यांयथाचद्वारकाख्यविष्णु

पुर्यांनयेवपुंडरीकाख्यविष्णुपुर्यामितिव्यंजनयार्थोबोध्यतेनदृनिश्लिष्टनरं॥तारकोपदेशेश्र
सिध्येद्वैयारप्रसिध्येद्वैयाश्वरूपमेणोक्तदृष्टांतदार्ष्टांतिकभावध्यंजनपरत्वस्यैवसामंज
स्यात्॥अन्यथाप्रसिध्द्वैयोपादानस्यैकस्याएवविष्णुपुर्योउपादानस्यचनिर्हेतुकत्वाप
त्तेः॥नचविष्णुपुर्युपादानेमदनुग्रहादिनिश्चावानुग्रहोकिरसंगताविष्णुपुर्योविष्णवनु
ग्रहस्यासत्वाछिवानुग्रहासंभवात्तोद्वारकापिकाचनशिवपुर्यैवास्तिनिश्चकनीयं॥द्वारक
ख्यायाःशिवपुर्याअप्रसिध्देः॥वेष्णवेषुश्रीशिवस्यपरमानुग्रहदृत्यर्थस्यश्रीभागवतेप्र
त्रेतसाख्यानमार्कंडेयाख्यानादेोप्रसिध्यत्वेनविष्णुपुर्यामपिशिवानुग्रहसंभवादितिदि
क्॥तथाचस्कंदपुराणस्थश्रीमामाहात्म्ये॥पांडुरंगमातुलिंगंधूलरेवटंचरेवटकं॥सर्वत्र रांमू
स्कलमाश्रीमाचनुःस्थानेषुदुर्लभेनि॥तथा॥तस्माद्योजनमात्रेणसर्वतःपापनाशनं॥ ५५

पोंडरीकमितिख्यातंनो र्थंत्रैलोक्यविश्रुतं॥तत्रास्तेभगवान्विष्णुर्मुक्तानंदप्रदायकः॥गोप
वेषधरोनित्यंमायूरबर्हिभूषणः॥पुंडरीकमुनेर्मुक्त्यातत्स्थानंनविमुंचति॥पांडुरंगइ
तिख्यातोविष्णुर्विपुलमूर्तिदः॥तद्दर्शनाद्दिनेषएसुरक्षानामास्यदंभवत्॥इतिद्वैतीया
ध्यास्यानि॥अथचतुर्थेध्याये॥आषाढशुक्लैकादश्यामुपोष्यहरिमर्चयेत्॥पांडुरंगोस्थि
तंदृष्ट्वयःसमुक्तिमवाप्नुयात्॥कार्तिकेनुसितेपक्षेएकादश्यांविशेषतः॥पूजनेयद्गोपवेष
नेपांडुरंगेस्थितंहरिमिति॥एवंचंद्रत्नामहात्म्यगतानिचांसिप्रागवलिखितानि॥तथा
करवीरमाहात्म्ये॥तत्रश्रीविठ्ठलंदेवंप्रियाभ्यांसहदृष्ट्वा॥मिनं॥नंदृष्ट्वाविस्मिताप्राहस्वप्रि
यंरूक्मगासतीत्यादिनिचहृनिचांस्कपलभ्यंतेविस्तरभियानेहलिखितानि॥तथापद्म
पुराणेोत्तरखंडेगानामहात्म्ये॥त्रिनवत्युत्तरशततमेपत्रेजानश्रुतिभूपतेःकृतस्यैरेक

ऋष्यन्वेषणायप्रवृत्तस्यतीर्थसेत्रपर्यटनोक्तिप्रसंगेश्रीनरहरीत्यादिनाभीमरथीतीरेश्री
विठ्ठलंदृष्ट्वागोदावरीजन्मेत्युक्तं॥ततोनिवृत्तआयातःपत्रयन्भीमरथीतटे॥ट्टिमुजंवि
ठ्ठलंदेवंभुक्तिमुक्तिप्रदायकं॥ततोगोदावरीजन्मस्थानंब्रह्मगिरिंहानित्यादि॥ननु
माहात्म्यानांप्रामाण्यंमयानांगीक्रियतेनूनिषेधेनूअर्थवोधोस्ति॥कौरूकल्पादिग्रंथेषुम
ल्लारिमाहात्म्यादिवचनान्युदाहृत्यननुधर्मकालानांनिर्णीतित्वंयेवमाहात्म्यप्रामाण्य
नंगीकारेकारेकथंनार्थबोधत्वं॥उपलभ्यतेचेदानीमुपलभ्यमानपाम्लोत्तरखंडेगीतामा
हात्म्यं॥एतद्भंजनायेवपत्रसंख्याग्रहणं॥तत्पुलकेपद्मपुराणेगीतामाहात्म्यंन
त्रश्रीविठ्ठलश्लोकश्चोपलभ्यतेमदीयपुस्तकेनदृश्यतेनोपलभ्यतेकचिद्गीतामाहा
त्म्योपलंभापितत्रायंश्रीविठ्ठलश्लोकोनदृश्यतइत्यादिवाक्यानुचनुरानंदेनाविदुष्य

रिहरा॥सर्वपुस्तकानांतत्रतत्रग्रंथेभ्रंशराहित्येनोपलंभासंभवात्॥श्रीभागवतेवत्सा
हरणाद्ध्यायत्रयस्योद्धेनानुसारिसर्वटीकापुस्तकेषूपलंभेपिमाध्वैरनंगीकाराच्च
तस्मात्तत्पुस्तकेनुपलंभस्यग्रंथांशकल्पनयोपपत्तेर्नपुस्तकांतरोपलभ्यमानग्रं
थस्याप्रामाण्यंवक्तुमुचितं॥एतत्सर्वमाहात्म्येषुपूर्वलिखितेषुयोज्यं॥एतेनहा
रद्वाध्यात्मकस्कंदपुराणस्यस्यश्रीपांडुरंगमाहात्म्यस्यद्वात्रिंशद्ध्यायात्मकप
द्मपुराणस्थस्यचप्रामाण्यंव्याख्यातं॥नचसर्वत्रावद्यमानस्कंदपुराणातिरेकेण
नीमानीर्थादिमाहात्म्यप्रतिपाद्यकःखंडएवनालीतिवाक्यं॥कौरूकेश्रीमदनंतदे
वेनस्वयंप्रतिपादनात्॥तथाचतत्रोपक्रमउपसंहारेचपद्यं॥गंतुंनार्हतियत्रस्वएवमे
पिमनुजात्मत्रदेशेस्थितान्योदूरीकृत्यविलारीन्निजभुजविलसद्भंडकोदंडना

ऐः॥श्रीमद्भीमेशानीर्थप्रभृतिबृहत्सरोदेवसद्दशशाकीःस्पष्टीकर्तुंपुराणंपरनगरगतं
स्कंदखंडंजहोरेति॥एवंमंत्रप्रणाल्लगनानि॥नन्वेवाक्यान्यप्युदाहार्याणि॥नन्वेवमपि
ननन्माहात्म्यादीनांनतद्वाक्यानांचपुल्लंकेपूपलंभानुपलंभाभ्युपगमेकिमनुपलंभो
ग्रंथभंगानिमित्तकः किंवोपलंभएवपुस्तकलग्रंथप्रक्षेपनिमित्तसंशयदवोभा
नसतद्भावांकुरदाहकः कथंशमनीयइतिचेत्॥शिष्टाचारकादंबिन्यमृतासारेत्येवं
हि॥श्रुत्यर्थेषुहिसंदेहःस्मृतिपुराणवचोभिरपनोद्यः॥स्मृतिपुराणवाक्येषुसमूलत्व
दिसंदेहःशिष्टाचारैरपनोद्यइत्युक्तत्वात्॥यद्धिपुराणादिवाक्यंशिष्टाचारानुगुणंत
त्प्रमाणमितिनिश्चेयंयत्पुनःशिष्टाचारविरुद्धंतद्वाक्यस्यार्थोयावत्प्रामाण्यनिश्चयेना रांमू
नुष्ठेयंदृष्टिव्यवस्थायानिर्बाधत्वात्॥एतेनाशिष्टैःकैश्चित्कविभिर्यत्किंचिद्वामादि ५७

षयकमाहात्म्यंयत्किंचित्पुराणेनाम्नाविरच्यतेदृष्टंतत्तुल्यानीमानिपांडुरंगमाहात्म्या
दीनिनात्रिकपनांशंकावेदविषयकबोधीयकृतकत्वादिशंकातुल्यानिरत्ना॥कविकृतमा
हात्म्यविषयेयदिशिष्टाचारसंवादस्तर्हिशिष्टाचारानुमेयस्मृत्यनुपूर्वेतर्कतःसक
विग्रंथःपुराणनाम्नोत्वमात्रंदोषः॥यदितुशिष्टाचारसंवादानुपलंभस्तर्हिसकविग्रं
थानुपादेयइत्येवोचाम॥शिष्टाचारोहिश्रुतिस्मृतिमूलानुपलंभेपिस्मृत्याद्यनुमानद्वा
राद्दष्टनरंप्रमाणमितिप्रतिष्ठंपूर्वमीमांसादिशास्त्रविदांमंगलाचरणादेःशिष्टाचा
रस्यस्मृत्यनुमानद्वाश्रुत्यनुमापकत्वस्यसर्वग्रंथसंमतत्वात्॥एएवेवेदार्थज्ञा
नारब्धदर्शानुष्ठानारब्धनएवाष्टकादिस्मृतिप्रणेतारइत्येवंरूपस्यएवोपनयना
दिवेदार्थविषयकस्मृतिकर्तारइत्यवंरूपस्यचकर्तृसामा

त्यपूर्वं नित्योपपादितस्याप्रामाण्यकारणस्याष्टकादिस्मृतिविधाचोरपिये एवश्रोतस्मा
र्तानुष्ठानारब्धैवंविधाचारकर्तारइतिकर्तृसामान्यस्याप्रामाण्यसूत्रस्यपूर्वमीमांसा
यांस्मृतिपादएवसमर्थितत्वाच्च॥अथान्यद्दृष्टान्तरशिष्टाचारनिश्चायकानिकानिचि
न्तनद्वंथकारवचनान्यूदाहियंते॥निर्णयसिंधावादियंथप्रणेताकमलाकरभट्टप्रभृति
भिस्तत्रतत्रप्रमाणत्वेनोपन्यस्तायाःकालनिर्णयदीपिकायामंगलाचरणंपद्यं॥
कालचक्रप्रणेतारंनत्वाश्रीविठ्ठलंगुरूत्तमं॥धर्मज्ञानायमानस्यःकालनिर्णयदी
पिकामिति॥तथाप्रक्रियाकौमुद्यांमंगलाचरणं॥श्रीमद्विठ्ठलमानम्यपाणिन्या
दिमुनीनपिगुरून्॥प्रक्रियाकौमुदींकुर्मःपाणिनीयानुसारिणीमिति॥अस्यचग्रंथस्य
पंडितीयव्याख्यानंश्रीमद्विठ्ठलनामनिरूपणपरोग्रिमप्रथममंत्रव्याख्यानावसरे

उक्तमप्यर्थंपुनर्लिख्यते॥श्रीमद्विठ्ठलमानम्येति॥पुंडरीकाक्षमेवनिष्ठितंविष्णुंवि
ठ्ठलइतिरूढेननामातद्वासिनोजनाव्यपदिशंतीति॥सज्ञायांकेवलिप्यादिभ्यनावश्यं
मुत्पत्तिरादियतेचनुष्टयीशब्दानांप्रवृत्तिः॥जातिशब्दागुणशब्दाक्रियाशब्दाःसंज्ञा
शब्दाश्चेतिभाष्यकारवचनात्॥त्रयीशब्दानांप्रवृत्तिर्नसंतियदृच्छाशब्दइतिवार्तिक
कारदर्शनेनुक्रियाशब्दोयं॥नथाहि॥वेदनंविन्॥विदज्ञानेरूत्यस्मात्संपदादिभ्यश्चे
तिभावेक्विप्॥तेननठाःसत्याः॥ठःसत्येचदृढेधनाधित्यभिधानात्॥तानूत्तानित्व
करोतीतिविठ्ठलः॥लाआनेअस्मादानोनुपसर्गेकइतिकः॥आतोलोपइटिचेत्या
लोपः॥अतोनुग्रहकरत्वर्थः॥तदुक्तं॥विदाज्ञानेनठानूत्यानूलानिगृह्णातिय
स्त्वयं॥अज्ञानुग्रहकृद्देवोविठ्ठलःकथ्यतेनुधैरिति॥अन्येवेथनंविन्॥ॐ॥च

विधूयांचेनेङ्गितंतः॥तयाठाः शून्यानिस्पृहात्मानूत्यागीनिविदुलइत्याचक्षते॥तस्यवि
शिष्टफलप्रदत्वसमर्थनायशत्र्युपधानंदर्शितंश्रीमदिति॥श्रीयतआश्रीयतेलक्षे
तिश्रीः॥ङिपूर्वविप्रकाशनस्यकटप्रुङ्श्रीणादीर्घोसंप्रसारणंचेतिङिपूर्वदीर्घश्च॥वि
नुश्रयंत्येनामितिश्रीरितिनत्वात्पर्यंकथनंनविग्रहवाक्यं॥कर्मणिङिपूर्विधानान्नु
श्रयंतीतिकर्त्रर्थतिङंतस्यासमानार्थत्वात्॥इहचिसमानार्थेन हिवाक्येनभवितव्यं
मितिनाप्योक्तेः॥यत्तुदात्यनेनदात्रंदीयतेस्मेदानीयङ्लुगित्रसमानार्थस्या
संभवाल्लिंचित्साम्येनागत्यावाक्यंभवति॥श्रीर्नित्यमस्मिन्स्तीतिश्रीमान्॥नि
त्ययोगेमनुप्॥तच्चासौविदुलश्चेतिकर्मधारयः॥एतेनश्रीसरस्वत्योःस्वभाववि
रोधेपिपरमर्त्यालोःश्रीविदुलस्यानुग्रहमवलंब्यग्रहनत्वस्यात्यंयस्याश्रीर

ORIENTAL RESEARCH INSTITUTE

स्त्वंनालीतिध्वनिनं॥विदूठलशब्दश्चपृषत्वर्तयोष्ठेोभवनः॥नठद्वयंलक्षणाभावात्
कालाठ्ठञित्यादावपिठद्वयपाठप्रमाणंनालि॥आनम्येत्याडाभावेश्मन्नित्यादिनायं
लक्षणःप्रकर्षेणोत्यंतेइति॥अयंचपांडुःकृष्णपंडितानांग्रंथः॥एतेचभट्टोजिदी
क्षितगुरवः॥अस्यश्रीविदुलनाममंत्रस्यौशनसःपुरुषस्ऋष्यनुष्टुप्छंदःप्रथमायामृचिदृग्व
नि॥सनःमिंविश्वतोवृत्वात्यनिष्ठदृग्वांगुलमित्यत्रविश्वतःपदेवीनिवर्णद्वयस्यानि
ष्ठदित्यत्रठकारठकारराकाराणांमंगुलमित्यत्रलकारराकारयोःस्वरूपेणऋमनएक
मंत्रेउपादानात्॥अनिष्ठदित्यत्रशारःस्वग्रहनिठद्वित्वेपूर्वस्यस्वरिवेतिचर्त्वेटठसो
र्लिप्तेः॥वेदेवैकल्पिकद्वित्वादिकार्यंभावपक्षेणैवपाठस्यवर्णक्रमपाठकोभादि
संप्रदायेषुरूढप्रसिद्धत्वात्॥तथाचभास्कररायकृतसप्तशतीटीकायां॥चतुर्थीमे

मोक्षोऽकः॥मंत्रराजोऽयस्यास्तरस्यादेवतायस्यास्तरस्यचयदंगेन्यास्यस्तद्देवतावाचकस्तदंगवाचकस्त्रयाणस्तदक्षरबोधकः॥यथाशिरःपदंकेन्द्रादिपदंचाकारस्तदेवंयःन्द्रोयदक्षरार्थःसोपिनद्रावाचकः॥यथाऐंस्वर्यंत्रह्मऐंकारस्य॥तत्तदक्षरार्थस्वरूपमपिनद्रावाचकमिति॥तथाचतंत्रेवऐंह्रींक्लींचामुंडायेविच्चेरतिनवार्णीमंत्रोक्षरप्रसंगे॥यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच॥सारसृष्टिकर्त्र्यैहृदयंपदेनऐंबीजस्यतस्यैवपुनर्नमश्चेतयकारोनरेकारस्यचोच्चारः॥ह्रस्यपदेननद्देवतककारस्यकामबीजस्यस्य॥हरद्वितस्वरूपेणह्रींबीजस्यहकारेरफयोः॥एवंवमतुलमित्यनेनस्वरूपतएवतन्मंत्रस्थवकारमकारनकारोकारलकारबिंदूनांषण्णांनिर्देशादित्यादिरूपेणोक्तनवार्णीमंत्रस्थचतुर्विंशतिवर्णोक्षरोच्च

पस्यकमेणोक्तोविलरतियानुपयोगाच्चनेहलिख्यतेनतथानत्रैवग्रंथांतरोक्तनवार्णीमंत्रोक्षरोनूदितः॥परावराएंपरमेतिपरापदेनऐंबीजं॥महामायाप्रथमोतीतिमायापदेनह्रीं॥नत्यासमोहयेतेजगदितिमोकलोक्त्याकामबीजं॥चामुंडासंज्ञनीयतनीचामुंडापदं॥ज्योत्स्नातिवैचेंदुरूपिछेयेतिवैकारः॥विचित्रमिदमाख्यानमितिविच्॥मूयश्चेछाम्यहंश्रोतुमितिविकारइति॥इत्थंचैतद्दीत्वाविठुलनामोक्षारःस्मयुक्तनमः॥यतुतन्मंत्रमित्यादिनासर्वग्रंथेषुसर्वमंत्राणामेवमुक्षारःसंमतेदितिनचमत्कारइतिग्रंथांतरोक्तमंत्रोक्षारदूषणमुक्तंनदृतिव्यवधानात्क्रमाभावाच्चचमत्काराभावपरं॥अन्यथाहरश्चचमतुलमित्यादिषुस्वयमेवहकारेरफचकारादीनांस्वरूपेणोक्षारमुक्तापरंतोदोषोक्तेरयुक्तत्वात्॥एकत्रश्लोकेश्लोकार्धवाक्यमेणाव्यवधानेनवाचतुर्विधेषुन्यूनप्रकारेणमंत्रोक्षारेचम

त्कारएव॥एकेनैवप्रकारेणैकत्रैवपदेक्रमेणैवर्णेधारेव्यवधानेपिचमत्कारानिष्ठयोनुभव
सिद्धोनापिलपितुंशक्यः॥अनएवश्रीमयूरेश्वरपंडितकवीश्वरेणमंत्रमयंभागवतेमंत्रम
यरामायणेचद्वादशाक्षरमंत्रवर्णाःश्रीरामजयरामेत्यादित्रयोदशाक्षरवर्णाश्चक्रमेणो
पनिबद्धावर्णांतरसंमिश्रेणैनकथार्थबोधयंतोमंत्रानुपूर्वमिपिबोधयंतीतिचमत्कारवि
शेषानादृत्यकाव्यरचनोपपद्यते॥चमत्कारभावेकाव्यत्वासंभवात्॥प्रकृतेसप्तभूमिमितिऋग
र्धेसप्तशब्देक्रमेणविठ्ठलनामवर्णानांवर्णांतरव्यवहितानामप्युपलक्षकत्वेनचमत्कारः॥
तस्माच्चमत्कारभावरूपदूषणाभ्रमरादत्तदक्षराणांत्वरूपमपितद्वाचकमितिचतुर्थप्र
काराश्रयेणपुरुषसूक्तप्रथममंत्रेविठ्ठलनामोक्षारेयुक्तनरः॥नचेवंसत्याऋचएतद्दे रंगम्
वताबोधकत्वाभावात्कथमत्रतन्नामोक्षारउक्तिवाच्यं॥श्रीविठ्ठलदेवताबोधकत्वोपपत्तेः ६१

तथाहि॥यःसहस्रशीर्षत्वसहस्रनेत्रत्वादिलक्षणःपुरुषोविराडंतर्यामीत्यर्थः॥यद्वापत्रंत्
यदोरूपमदभ्रचक्षुषासहस्रपादोरुबाहुजाननाद्बहुनामित्योदोनानावतारनिदानत्वेनोक्त
रूपःपुरुषइत्यर्थः॥सएवविश्वतःसर्वस्माज्जगतीतलाद्भूरागुलमति अतिक्रम्यभूमिं
क्षेत्रमुवंदृत्वाआश्रित्यातिष्ठद्दशांगुलमितिकटिकरतलोर्ध्वरूपत्वंस्थो॥तथाचमाहात्म्येएतत्क्षेत्र
भूमेरंतरालस्थितिरुक्ता॥नात्रिनारदक्षेत्रस्यभूसंभेदःकथंचन॥वितस्तिमात्रनरत्व
कातिष्ठत्त्वंनरएवनत्व॥ज्योतिर्मयानियानानियथानमतिमानिवै॥एवंज्योतिर्मयंक्षेत्र
नमस्येवहिमासनरहरि॥अथवाविश्वतोविश्वस्मातिपूज्यंक्षेत्रभूमिंदृत्वादशांगुलंदशानां
पादांगुलीनांसमाहारोयथास्यानथासंयुक्तसमपदद्वंद्वनयेनियाव——तिष्ठद्धर्वस्थ
स्थो॥यद्वादशांगुलसमाहारंदृत्वासंयुक्तसमचरणनामाश्रित्यविश्वतोभूमिमतिसर्वस्मा

भूमेः पूज्यतयानस्थो॥ अतिरतिरतिक्रमेऽपेचेति पूजातिक्रमार्थयोरतिशब्दस्यकर्मप्रव
चनीयसंज्ञायांकर्मप्रवचनीययुक्ते द्वितीयेति॥ अथप्रक्रियाकौमुद्यनुसारेणटीकायां
प्रसादाभिधायांमंगलाचरणं॥ श्रीविठ्ठलंकरुणावरुणालयंप्रणमामिदेवंकारुण्यसिंधुमभि
लाषितदत्तबुद्धिं॥ ईषत्सहासमुखपंकजमात्मभासमुत्फुल्ललोचनविलोकनना
शिताघमिति॥ तथातेत्रैवग्रंथरूपाम्बाङ्के॥ कुलेयस्मिन्देवंसकलफलदंविठ्ठलमि
मुःस्मृतायस्मिन्श्रीक्षाहरिहरमनुषागमयुता॥ रतिर्निर्व्याढ्रैतेनममलमनंतागम
पथंबुधाःसंसेवंतांकथितमसकृद्रामगुरुमिरिति॥ अद्वैतमकरंदादिग्रंथप्रणेतृ
लक्ष्मीधरपंडितकृतभगवन्नामकौमुदीग्रंथाद्यपद्यांते॥ सजयतिश्रीपुंडरीकप्रियरङ्गे रांमू
व्याख्यानंचैतन्मीमांसाधिपारीणश्रोतस्मार्तविषयककौस्तुभादिग्रंथकर्तृनंत ६२

देवपितामहेत्यत्रनामकैलाद्यविद्यादिगुणाख्यालिंगिनः॥ पुंडरीकप्रियरङ्गिश्रीविठ्ठलइ
त्यर्थइति॥ एवमन्यान्यपिप्रक्रियाकौमुदीटीकाकृतांकालनिर्णयदीपिकादिटीकाकृ
तांचवचनानिपरःशतानिद्रष्टव्यानिविस्तरभियानेहोदाहृियंते॥ तथाकुवलयानंद
टीकायांमंगलपद्यं॥ कंदर्पोयतियःपुरोमृगदृशांकांत्याययानाभवद्रोपीनांयदनु
हिनंरतमहोनत्काकनालीयकं॥ त्वांतंमध्यमरायतेरदनरंयत्पादयुग्मांबुजेमेघश्या
मलमिंदुतुल्यवदनंश्रीविठ्ठलंनोमिनमामि॥ अस्मिंपद्येष्टधालुनामपमाःसंति॥
किंचगोदावरीतीरेप्रतिष्ठानक्षेत्रेवास्तव्याएकनाथाभिधानाःसाधुराजराजिस्व
कटालंकारालेश्रीविठ्ठलोपासकाद्दत्यसंदिग्धं॥ तत्कृतभाषाकाव्यस्यपरःसहस्र
स्यविठ्ठलपरस्योपलभ्यमानत्वात्॥ नचकौस्तुभकर्तृनंनंदेवपितामहस्यपितामह

हाः ॥ तथाचैकोलुप्तादोश्लोकाः ॥ आसीद्गोदावरीतीरे वेदवेदांगपारगः ॥ श्रीकृष्णो नाम क्रियमानेकएकनाथोतिधोद्विजः ॥ तत्कृतत्वद्गुणैर्युक्तः सर्वशास्त्रार्थतत्ववित् ॥ आप दिवो भवेद्वाक्यात्पयःसकलान्मनून् ॥ २ ॥ मीमांसानयकोविदोमधुरिपोःसेवासु नित्योद्यतो विद्यादानविनोदितोत्तमयशा आसीत्तदीयात्मजः ॥ यस्यानंतगुणैरनंतइतिसन्नाम्नार्थवन्नांगनंयेनावादिचवादिनांश्चनिशिरःसिक्षांननंतंमुदे ॥ ३ ॥ न्यायप्रकाशकर्तानिरवधिविद्यामृतप्रदःसततं ॥ मीमांसाद्वयनयविन्नयरत्नाकरेदोमूत् ॥ ४ ॥ तदात्मजंवेदिकशास्त्रविसंसंतोसकृत्साहुरनंतदेवमित्यादि ॥ विश्वश्रीमद्भगवत्पादश्रीशंकराचार्यकृतंपरब्रह्मलिंगंभजेपांडुरंगमित्यंत्यपादस्थटितंपद्याष्टकमप्यत्रप्रमाणं ॥ नचास्याष्टकस्यश्रीशंकराचार्यकृतत्वेमानाभावः ॥ रांम् ६३

केनचित्कृतिनास्वयंविरच्याचार्यनामलिखितमित्यपिशंकासंभवादितिवाच्यं ॥ सर्वत्रश्रीमदाचार्यकृतत्वस्यैवप्रसिद्धत्वात् ॥ लोकप्रसिद्धिवाधेहेत्वभावात् ॥ स्वयंकृत्वान्यनामलेखनेबीजाभावाच्च ॥ काव्यंयद्यसेर्थकृतेनृत्यादिवचनाच्चिकाव्यंस्वयशःप्रवृध्यर्थं ॥ यावत्कीर्तिर्मनुष्यस्यपुण्यालोकेषुगीयते ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयतइत्यादिवचनेनयशसएवपुरुषार्थत्वात् ॥ लंकारिकैरप्युपगम्यत ॥ स्वकृतावन्यनामलेखनेन्यस्यैवकीर्तिफलसिध्यात्स्वयंकाव्यरचनस्यनिष्प्रयोजनत्वापातात् ॥ प्रयोजनमनुद्दिश्यनमंदोपिप्रवर्तनंनसिन्यायात्वप्रयोजनाभावेप्रवृत्तेरेवासिद्धेः ॥ नचस्वनामलेखनेनतथाप्रचारोनस्यादितिप्रचारार्थमाचार्यनामलेखनमितिसांप्रतं ॥ प्रचारमात्रस्यापुरुषार्थत्वात् ॥ प्रचारोहियशोद्वारापुरुषार्थः ॥ न

न्यनाम्नाप्रचोरनत्वयत्राःसिद्धिरित्यप्रकृतेरवापानात्॥कथंतर्हिमाधवाचार्यैर्वेदमाष्यादिषुसायणादेःस्वाम्नातुर्नामलिखितमितिचेत्॥कारुण्येनस्वाम्नात्रादेःस्वस्यवयत्राःपुरुषार्थसिध्यर्थतेनतंन्यायस्यान्याप्रकृतेरितिनकिंचिदेतत्॥अथविजयध्वजकृतायांश्रीमागवतटीकायांद्वैतमतानुगायांतृतीयेऽध्यायेगजेंद्रमोक्षेगलश्लोकौ॥यल्लीलाजलराशिलेशलहरीसंस्पर्शमात्रात्क्षणात्संसारादधिराशुमुष्यतिनरामग्नःकथंक्षेधवन्॥यस्माद्विश्वमशेषमुद्भवतियत्तत्वंपरंयोगिनांश्रीमंतंतमुपास्महेऽकमनसामिष्टप्रदंविष्टपं॥१॥सनीरनीरदत्रयामंसच्चिदानंदविग्रहं॥रमारमणमीशानंविष्टपंसमुपास्महे॥इति॥अथद्वैतमतस्थवादिराजस्वामिविरचितेतीर्थप्रबंधेश्लोकाः॥श्रीमन्मध्यमलिनीरसमीरवेगनिर्धूतनीरगनराशुभकर्मजालं॥श्रीपांडुरंगलसितंवरपुंडरीक

रांमू ६७

सन्नंपवित्रमहमन्वहमाश्रितोस्मीत्यादयः॥एवंश्रीमध्वाचार्यमतस्थानामन्येग्रंथादृष्ट्वाविस्तरभयान्नोक्ताः॥रामानुजसंमतलोकाःप्रदर्श्यन्ते॥एवमद्वैतवादिविशिष्टाद्वैतवादिद्वैतवादिनांश्रीमतस्थानांविशिष्टानामाचाराःप्रदर्शिताः॥मायातपोव्याधःपथिगीमरव्यादिगंधरःकोपितमालनीलः॥विन्यस्तहस्तोपिनितंबबिंबेधूर्तःसमाकर्षतिविस्मितोपि॥इत्यादिकर्णामृतादिकाव्येदाहरणानित्वंतरव्याणि॥पूर्वोक्तानेकमाहात्म्यवचांस्यपिनस्रग्नार्षलविगानपराणामश्रद्धानामापराणामपिविशिष्टाचारव्यंजनविधयापिप्रबलप्रमाणान्येव॥विशिष्टाचारस्वसर्ववेदार्थसमंतमनिरूढंप्रमाणमित्युक्तं॥येननुविशिष्टाचारप्रामाण्यंनमन्यतेनस्यब्राह्मणादेर्ब्राह्मण्यादिकंमवनसिध्येत्॥नयाहि॥येनोच्चैर्नीचैर्विशिष्टाचारोनमानमितिनंप्रतिवक्तुंव्यंतर्हिनवेदवरत्नस्यब्राह्मणत्वेकिंमानमिति॥नमाव

स्मृतिस्मृतौ॥ देवलोब्राह्मणएहत्येवंस्मृतिस्मृत्यभावात्॥ वसिष्ठविश्वामित्रौदेविवस्मृतिपुराणेषु
स्वर्ध्यजेकनिहासादेरभावात्॥ नचब्राह्मणत्वादिजातिर्गर्गवादिजातिवदनुगतसंस्थानव्यं
तयाप्रत्यक्षा॥ क्षत्रियादिव्यावृत्ताकारानुपलब्धेः॥ अतएवकर्णादेः क्षत्रियस्ययुद्ध
कुलेक्षत्रियत्वापलापोब्राह्मणत्वव्यापनंचस्मर्यते॥ एवंचाहनिग्रहणाजातिरित्युक्त
लक्षणाजात्वाभावाब्राह्मणत्वादेः प्रत्यक्षयाग्राह्यत्वं॥ ननुचसहस्रदारव्याननिग्रहो
तिहीनोयलक्षणोक्तजातित्वंवाच्यं॥ नचसहस्रदारव्याननंस्मृतिस्मृतिरूपमितियुक्तम
नःपौरुषवाक्यरूपंनद्वाक्यंनस्यचशिष्टाचारएवांतर्भावः॥ नाप्यनुमानंप्रमाणं
सहेत्वनुपलब्धेः॥ नचेदेवदत्तोब्राह्मणःयाजनादिषट्कर्मवत्वाद्वसिष्ठादिवदिति
सहेत्वादिसंभवरनिवाच्यं॥ क्षत्रियब्रह्मबंधादिमत्यपिषट्कर्मवत्संभवेनव्य

भिचारात्॥ नचविपक्षबाधकमानापितृजन्यत्वंहेतुः॥ विपक्षत्यानिर्वचनात्॥ षट्कर्मवत्वंवि
पक्षत्वमितिचेन्न॥ तस्यव्याभिचारितोक्तत्वात्॥ नापितृनिष्टब्राह्मण्यसंदेहविपर्यास
निरासकत्वात्संभवात्॥ एवंपितृपितामहादिपरंपरायामेवब्राह्मण्यसंशयादिसं
भवान्नानुमानेनेदंवदनादिविशेषब्राह्मण्यनिश्चयःसंभवति॥ हस्तंतरेणपित्र्यभि
चारायूहसंभवात्॥ नस्मोद्देवदनोदोविशेषब्राह्मण्यनिश्चयःसर्वैर्वेदैकैःशिष्टैः
परंपरयाब्राह्मणत्वेनपरिग्रहोदेवदत्तस्यवाच्यः॥ शिष्टाचारस्यप्रमाणत्वानंगीकारेनुन
कथमपिनिश्चयइतियुक्तमुक्तंयेनशिष्टाचारस्यमानत्वंनमन्येतनस्यब्राह्मणत्व
मेवनसिध्येदिति॥ नथाचश्रीविठ्ठलदेवनाविषयेउक्तस्मृतिपुराणयोर्मानत्वविवा
दपरेणापिसमनंतरोक्तशिष्टाचारमुपलभ्यतन्मूलभूतस्मृतिस्मृतीअनुमानव्येन

नावरंपूर्वोक्तस्मृतिपुराणानामेवतन्मूलत्वात्तत्प्रकाशकत्वम्॥अन्यथापिंडमुत्सृज्यकरंलेढीत्या
दिन्यायापत्तिरितिसुधीभिरालोचनीयं॥नत्तिस्थमुक्तमुनीनांश्रीविठ्ठलदेवतापरत्व
संन्यायकुलाचलःसमुदाहृतपुराणवचनकुलिशोसंक्षेदनीयःपुराणवचसामार्षत्व
दिसंदेहसंदोहपंकश्चशिष्टाचारस्फुरत्तरित्यूरणसंक्षालनीयइति॥ननुनग्नमूर्ति
र्नपूजनीयेत्यर्थकस्मृतिवचनानांधर्मशास्त्रेषूपलंभात्तैर्वचनैरस्यशिष्टाचारस्यबा
धितत्वान्नायमविगीतःशिष्टाचारइतिचेत्॥मैवं॥मूर्तिविशेषानुल्लेखेनसामान्य
परस्यवचनस्यश्रीविठ्ठलमूर्तिस्वविशेषविषयकपूर्वोक्तशिष्टाचारबाधकत्वासंभ
वात्॥प्रत्युतशिष्टाचारेणैवसामान्यवचनानांबोधमूर्तिविषयत्वकल्पनोपपत्तेश्च रांमू
॥नहिनग्नत्वमात्रेणबोधस्यं॥बालकृष्णशिवमूर्त्यादिप्रसंगात्॥किंतूपविष्टत्व ६६

दिधर्मविशिष्टनग्नत्वादिना॥नाद्यानामेवबोधमूर्तानांसत्वात्॥सामान्यवचनानामेवशि
ष्टाचारेणबोधोपपत्तेश्च॥ननुस्मृतेःसाक्षात्कृत्यनुमापिकायाःस्मृत्यनुमानद्वाराश्रुत्यनु
मापकेनशिष्टाचारेणबाधोनयुक्तइतिचेत्॥सत्यं॥प्रबलेनहिदुर्बलंबाध्यतेप्राबल्यंच
द्विविधं॥प्रमाणतःप्रमेयतश्चेति॥तत्राद्यंयथा॥औदुंबरीत्यष्टाक्षरायेतिश्रुतिप्रमाणे
नप्रबलेनोदुंबरीसर्वावेष्टयितव्येतिसर्ववेष्टनस्मृतेर्दुर्बलायाबाधः॥द्वितीयंयथा॥वेदं
कृत्वावेदिंकरोतीतिश्रुतेःक्रमप्रतिपादिकायाःश्रुतआचमेदित्याचमनपदार्थंप्रतिपा
दिकयास्मृत्याबाधः॥क्रमस्यपदार्थधर्मत्वेनश्रुतिप्रमेयत्वाद्दुर्बलत्वात्॥आचमनस्यप
दार्थत्वेनस्मृतिप्रमेयत्वस्यप्रबलत्वात्॥एवमत्रसामान्यार्थोद्विशेषार्थस्यबलवत्त्वेनप्रब
लस्यापिस्मार्तवचनस्यसामान्यार्थकत्वेनदुर्बलप्रमेयकत्वात्दुर्बलस्यापिशिष्टवच

नाचीनसदाचारस्यश्रीविष्णुलक्ष्मीरवरंयपूजनीयेत्येवंरूपविशेषार्थविषयकत्वेनप्रबलप्र
मयकत्वेननसदाचारेणस्मार्तवचनस्यैवेतरपरतारूपबाधितत्वकल्पनोचित्यात्॥इ
यमेवहिंसामान्यशास्त्रस्यविशेषशास्त्रबाध्यतानामयत्वेनरविषयनात्पर्यनाकल्पनं॥
यथाहवनीयेजुहोतीत्याहवनीयशास्त्रस्यपदेजुहोतीतिविशेषशास्त्रेणबाधः॥सामान्य
शास्त्रस्यपदेहोमाविरिक्तविषयकनाकल्पनात्मकः॥तेननसामान्यविशेषरूपशास्त्रद्वय
स्यापिप्रामाण्यं॥एवमत्रसामान्यस्मृतिवचनस्यविशेषाचारस्यचेत्युभयोरपिप्रामाण्यो
पपत्तेर्नैकतरस्याप्रामाण्यं॥अतएववचपरिभाषणएतिधानुरंतिपरोनप्रयुज्यते॥पा
णिनीयसामान्यस्मृतिप्राप्तस्यापिअंत्यादिपरवचधातोःप्रयोगस्यशिष्टाचारेवचनं रांमू
स्यादिप्रयोगाभावाच्छिष्टाचारेणबाधः॥पाणिनीयस्मृतेरितरधातुविषयकत्वसंभवेन ६७

माण्याभावात्॥स्मृतिवचेनाचारोबाधेसर्वोपाचारस्याप्रामाण्यमेवस्यात्॥यत्रतुस्मृतिरपिवि
शेषविषयाशिष्टाचारोपिविशेषविषयस्तत्रविषयेनेनाचारेणस्मृतिर्बाधेस्मृतेर्निर्वि
षयत्वंस्यात्तथाप्रामाण्यापातादुर्बलाचारस्यैवस्मृतिवचेननबाधःयथागृह्यजनप्रक्षण
पर्युषितान्नभक्षणाद्याचारस्यस्मृतिविरुद्धस्यस्मृतिर्बाधकेयंबाधः॥प्रकृतेतुननथेतिशि
ष्टाचारेणैवसामान्यस्मृतेर्बाधःनिकिंचाषाढ्यांदोषप्रतिवर्षलक्षाधिकसंख्यैःपामरज
नैःसुदूरस्थैरप्यागत्यस्वयंव्यक्तपरमेश्वराधियापूजनवंदनादिबहुविधसेवनस्यबहुफ
लमाराध्याचरणात्यामरलोकप्रसिद्धिरस्यत्रविशेषनःशिष्टाचारस्यस्मृतिवचनस्यच
बाधकस्यानावेदृढंप्रमाणं॥चोदितंतुप्रतीयेनाविरोधात्समाप्तेनेतिसूत्रेणस्मृतिपा
दिशिष्टाचारप्रसिद्धिविरोधानावेश्लेषप्रसिद्धेरपिप्रमाणत्वोक्तेः॥श्लेषेःस्वोदितम

पप्रतीयेतप्रमाणंस्यात्प्रमाणेनार्थव्यवहारेणाविरोधादितिसूत्रार्थान्॥नचात्रनिष्टोक्ति
विरोधः॥ङ्कापिग्रंथेऽनेनसेवादिविधानानांवान्॥साधकस्यग्रंथोक्तनिष्टाचारस्यबहु
नरस्योक्तत्वात्॥तस्माद्सतिबाधकेलोकप्रसिद्धिरप्यत्रप्रमाणमेव॥अतएवव्याक
रणादिशास्त्रेषुभाष्यादावंतरंगबलीयस्त्वादिपरिभाषाणांन्यायानांचलोकप्रसिद्ध
वाकिलत्रनेत्रोपलभ्यते॥लोकस्याप्रमाणेतेलौकिकन्यायानामुच्छेदापत्तेः॥तस्मा
दाविद्वद्गनागोपालंप्रतिश्रीविठ्ठलदेवतासेवादिमाहात्म्यनकेनाप्यपह्नोतुंश
क्यमितिसर्वमनवद्यं॥तत्रिश्रीविठ्ठलदेवतानीर्थसेवादेःऋतिपुराणागमनिष्टा
चारलोकप्रमाणैःप्रतिपाद्यत्वं॥तत्रश्रद्धालूनांपूर्वपूर्वप्रमाणैरुत्तरोत्तरप्रमाणा रांमू
दार्ढ्यं॥मंदश्रद्धानांतूत्तरोत्तरमानवतोनपूर्वपूर्वमाननिश्चयइतिसर्वमनवद्यं॥६॥ ६८

ल

रत्यमृग्वेदपठितामंत्राद्दादश्विभक्ताः॥श्रद्धालुविबुधप्रीत्यैसुव्याख्यानायथामति॥
॥१॥बालानांबोधदार्ढ्यार्थमेतदाम्नेडनोदितं॥परमंसाहसंचापिक्षमतांमेबुधज
नाः॥२॥ऋत्याद्येकतमेनापिप्रमाणेनऋभिश्चयः॥श्रद्धावतांसमूमेनश्रयंनुरवल
नुश्चये॥३॥सिद्धांतरसंयदिसंभ्रमरोषहरंरवलोनगृह्णीयान्॥तदपिनहानिर्दो
द्यात्कधारसंसंन्निपातीव॥४॥स्तुत्यादिप्रतिपाद्यायमीशारत्यंहिसूरिभिः॥व्या
सोद्येर्बहुधाप्युक्तंश्रीकृष्णंनाद्रियन्खलाः॥५॥तत्रैषप्रयासोमेनफलीस्यात्ल
यंवचन॥तयापिश्रीशसेवेयमितिव्यवसितामतिः॥६॥श्रीमद्विठ्ठलदेवतादिविष
यःस्तुत्यादिमानत्रयेभाष्यंभाष्यविरामतंविरचितंमोरप्रबंधीमतां॥कान्तीनाथ
समाह्वयेनविदुषांश्रेष्ठाद्नंतामिधोपाध्यायोद्भवनासुपादकमलेश्रीविठ्ठलस्या

र्पितं॥ ७ ॥इतिश्रीमदनंतोपाध्यायसूरिसूनुकान्हानाख्योपाध्यायविरचितंश्रीमद्दिव्य
लक्षरुद्रमंत्रसारभाष्यंसमाप्तिमगत्॥श्रीसद्गुरुपांडुरंगार्पणमस्तु॥श्रीमदनंतगुरु
प्रसन्नोभवतु॥श्रीमत्साधुसाधीःप्रसादपरायणानःकरणाःसंतु॥श्रीरस्तु॥शुभं
भवतु॥ ॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवामममदो
षोनविद्यते॥ ॐ ॥ ॐ॥ ॐ॥ ॐ॥ ॐ ॥श्रीः॥रांमरांमरांमरांमरांम

Digitized with financial assistance from the Government of Maharashtra on 11 June 2017

॥ इतिश्रीविठ्ठलमंत्रसारभाष्यःसमाप्तोयंश्रीरामः॥